अथ युधिष्ठिरगीता ॥

जनमेजय उवाच—एवं हृतायां भार्यायां प्राप्य क्लेश-
मनुत्तमम्॥प्रतिपद्य ततः कृष्णां किमकुर्वत पांडवाः ॥
वैशंपायन उवाच—एवं हृतायां कृष्णायां प्राप्य क्लेशम
नुत्तमम्॥विहाय काम्यकं राजा सहभ्रातृभिरच्युतः २॥
पुनर्द्वैतवनं रम्यमाजगाम युधिष्ठिरः ॥
स्वादुमूलफलं रम्यं विचित्रबहुपादपम् ॥. ३ ॥
अनुभुक्तफलाहाराः सर्वएव मिताशनाः ॥
न्यवसन्पांडवास्तत्र कृष्णया सह भार्ययां ॥ ४ ॥
वसन् द्वैतवने राजा कुंतीपुत्रो युधिष्ठिरः ॥
भीमसेनोर्जुनश्चैव माद्रीपुत्रौ च पांडवौ ॥ ५ ॥

ब्राह्मणार्थं पराक्रांता धर्मात्मानो यतव्रताः ॥
क्लेशमाच्छंत विपुलं सुखोदर्कं परंतपाः ॥ ६ ॥
तस्मिन्प्रतिवसंतस्ते यत्प्रापुः कुरुसत्तमाः ॥
वने क्लेशं सुखोदर्कं तत्प्रवक्ष्यामि ते शृणु ॥ ७ ॥
अरणीसहितं मंथं ब्राह्मणस्यत पस्विनः ॥
मृगस्य घर्षमाणस्य विषाणे समसज्जत ॥ ८ ॥
तदादाय गतो राजंस्त्वरमाणो महामृगः ॥
आश्रमान्तरितः शीघ्रं प्लुवमानो महाजवः ॥ ९ ॥
ह्रियमाणं तु तं दृष्ट्वा स विप्रः कुरुसत्तम ॥
त्वरितोभ्यागमत्तत्र अग्निहोत्रपरीक्षया ॥ १० ॥
अजातशत्रुमासीनं भ्रातृभिः सहितं वने ॥
आगम्य ब्राह्मणस्तूष्णीं संतप्तश्चेदमब्रवीत् ॥ ११ ॥
अरणीसहितं मंथं समासक्तं वनस्पतौ ॥
मृगस्य घर्षमाणस्य विषाणे समसज्जत ॥ १२ ॥
तमादाय गतो राजंस्त्वरमाणो महामृगः ॥
आश्रमात्त्वरितः शीघ्रं प्लुवमानो महाजवः ॥ १३ ॥
तस्य गत्वा पदं राजन्नासाद्य च महामृगम् ॥
अग्निहोत्रं न लुप्येत तदानयत पांडवाः ॥ १४ ॥
ब्राह्मणस्य वचः श्रुत्वा संतप्तोऽथ युधिष्ठिरः ॥
धनुरादाय कौंतेयः प्राद्रवद्भ्रातृभिः सह ॥ १५ ॥

सन्नद्धा धन्विनः सर्वे प्राद्रवन्नरपुंगवाः ॥

ब्राह्मणार्थे यतंतस्ते शीघ्रमन्वगमन्मृगम् ॥ १६ ॥
कर्णिनालीकनाराचानुत्सृजंतो महारथाः ॥
नाविध्यन्पांडवास्तत्र पश्यंतो मृगमंतिकात् ॥ १७ ॥
तेषां प्रयतमानानां नादृश्यत महामृगः ॥
अपश्यंतो मृगं श्रांता दुःखं प्राप्ता मनस्विनः ॥ १८ ॥
शीतलच्छायमागम्य न्यग्रोधं गहने वने ॥
क्षुत्पिपासापरीतांगाः पांडवाः समुपाविशन् ॥ १९ ॥
तेषां समुपविष्टानां नकुलो दुःखितस्तदा ॥
अब्रवीद्भ्रातरं श्रेष्ठममर्षात्कुरुनंदनम् ॥ २० ॥
नास्मिन्कुले जातु ममज्ज धर्मो न चालस्यादर्थलोपो बभूव॥अनुत्तराः सर्वभूतेषु भूयः संप्राप्ताः स्मः संशयं किन्तु राजन् ॥ २१ ॥

इति युधिष्ठिरगीतायां प्रथमोऽध्यायः ॥ १ ॥

युधिष्ठिर उवाच--नापदामस्ति मर्यादा न निमित्तं न कारणम् ॥ धर्मस्तु विभजत्यर्थमुभयोः पुण्यपापयोः ॥ १ ॥ भीम उवाच--प्रातिकाम्यनयत्कृष्णां सभायां प्रेष्यवत्तदा॥ न मयानिहतस्तत्र तेन प्राप्ताः स्मसंशयम् ॥ २ ॥ अर्जुन उवाच--वाचस्तीक्ष्णास्थिभेदिन्यः सूतपुत्रेण भाषिताः ॥ अतितीव्रा मयाक्षांतास्तेन प्राप्ताःस्म संशयम् ॥ ३ ॥

सहदेव उवाच--शकुनिस्त्वां यदाजैषीदक्षद्यूतेन भारत॥

स मया न हतस्तत्र तेन प्राप्ताः स्म संशयम् ॥ ४ ॥
वैशंपायन उवाच--ततोयुधिष्ठिरो राजा नकुलं वाक्यमब्रवीत्॥आरुह्य वृक्षं माद्रेय निरीक्षस्व दिशो दश ॥ ५ ॥
पानीयमंतिके पश्य वृक्षांश्चाप्युदकाश्रितान् ॥
एतेहि भ्रातरः श्रांतास्तव तात पिपासिताः ॥ ६ ॥
नकुलस्तु तथेत्युक्त्वा शीघ्रमारुह्य पादपम् ॥
अब्रवीद्भ्रातरं ज्येष्ठमभिवीक्ष्य समंततः ॥ ७ ॥
पश्यामि बहुलान्राजन्वृक्षानुदकसंश्रयान् ॥
सारसानां च निर्ह्रादमत्रोदकमसंशयम् ॥ ८ ॥
ततोब्रवीत्सत्यधृतिः कुंतीपुत्रो युधिष्ठिरः ॥
गच्छ सौम्य ततः शीघ्रं त्वरैः पानीयमानय॥ ९ ॥.

नकुलस्तुतथेत्युक्त्वा भ्रातुर्ज्येष्ठस्य शासनात् ॥
प्राद्रवद्यत्र पानीयं शीघ्रं चैवान्वपद्यत ॥ १० ॥
स दृष्ट्वा विमलं तोयं सारसैः परिवारितम् ॥
पातुकामस्ततो वाचमंतरिक्षात्स शुश्रुवे ॥ ११ ॥
यक्ष उवाच--मातात साहसं कार्षीर्मम पूर्वपरिग्रहः ॥
प्रश्नानुक्त्वा तु माद्रेय ततः पिब हरस्व च ॥ १२ ॥
अनादृत्य तु तद्वाक्यं नकुलः सुपिपासितः ॥
आपिबच्छीतलं तोयं पीत्वा च निपपातह ॥ १३ ॥
चिरायमाणे नकुले कुंतीपुत्रो युधिष्ठिरः ॥
अब्रवीद्भ्रातरं वीरं सहदेवमरिन्दमम् ॥ १४ ॥
भ्राता हि चिरयातो नः सहदेव तवाग्रजः ॥
तथैवानय सोदर्य्य पानीयंच त्वमानय ॥ १५ ॥

सहदेवस्तथेत्युक्त्वा तां दिशं प्रत्यपद्यत ॥
ददर्श च हतं भूमौ भ्रातरं नकुलं तदा ॥ १६ ॥
भ्रातृशोकाभिसंतप्तस्तृषयाचप्रपीडितः ॥
अभिदुद्राव पानीयं ततो वागभ्यभाषत ॥ १७ ॥
मा तात साहसं कार्षीर्ममं पूर्वपरिग्रहः ॥
प्रश्नानुक्त्वा यथाकामं पिबस्व च हरस्व च ॥१८ ॥
अनादृत्य तु तद्वाक्यं सहदेवः पिपासितः ॥
अपिबच्छीतलं तोयं पीत्वा च निपपातह ॥ १९ ॥
अथाब्रवीत्स विजयं कुंतीपुत्रो युधिष्ठिरः ॥
भ्रातरौ ते परिगतौ बिभत्सो शत्रुकर्शन ॥ २० ॥
तौ चैवानय भद्रं ते पानीयं च त्वमानय ॥
त्वं हि नस्तात सर्वेषां दुःखितानामपाश्रयः॥ २१ ॥

एवमुक्तो गुडाकेशः प्रगृह्य सशरं धनुः ॥
आमुक्तखड्गो मेधावी तत्सरः प्रत्यपद्यत ॥ २२ ॥
ततः पुरुषशार्दूलौ पानीयहरणे गतौ ॥
तौ ददर्श हतौ तत्र भ्रातरौ श्वेतवाहनः ॥ २३ ॥
प्रसुप्ताविव तौ दृष्ट्वा नरसिंहः सुदुःखितः ॥
धनुरुद्यम्य कौंतेयो व्यलोकयत तद्वनम् ॥ २४ ॥
नापश्यत्तत्र किंचित्स भूतमस्मिन्महावने ॥
सव्यसाची ततः श्रांतः पानीयं सोभ्यधावत ॥ २५ ॥

अभिधावंस्ततो वाक्यमंतरिक्षात्स शुश्रुवे ॥
किमासीदसि पानीयं नैतच्छक्यं बलात्त्वया ॥ २६ ॥
कौंतेययदि प्रश्नांस्तान्मयोक्तान्प्रतिपत्स्यसे ॥
ततः पास्यसि पानीयं हरिष्यसि च भारत ॥ २७ ॥
वारितस्त्वब्रवीत्पार्थो दृश्यमानो निवारय ॥
यावद्बाणैर्विनिर्भिन्नः पुननैवं वदिष्यसि ॥ २८ ॥
एवमुक्त्वा ततः पार्थः शरैरस्त्रानुमंत्रितैः ॥
प्रववर्ष दिशः कृत्स्नाः शब्दवेधं च दर्शयन् ॥२९॥
कर्णिनालीकनाराचानुत्सृजन् भरतर्षभ ॥
सत्वमोघानिषून्मुत्क्वा तृष्णयाभिप्रपीडितः॥ ३० ॥
अनेकैरिषुसंघातैरंतरिक्षे ववर्षह ॥

यक्षउवाच ॥

किं विधानेन ते पार्थ प्रश्नानुक्त्वा ततः पिब ॥ ३१॥
अनुक्त्वा च पिबन्प्रश्नान्पीत्वैव न भविष्यसि ॥
एवमुक्तस्ततः पार्थः सव्यसाची धनंजयः ॥ ३२ ॥
अवज्ञायैव तां वाचं पीत्वैव निपपातह ॥
अथाब्रवीद्भीमसेनं कुंतीपुत्रो युधिष्ठिरः ॥ ३३ ॥

नकुलः सहदेवश्च बीभत्सुश्च परंतप ॥
चिरं गतास्तोयहेतोर्नचागच्छंति भारत ॥ ३४ ॥
तांश्चैवानय भद्रं ते पानीयं च त्वमानय ॥
भीमसेनस्तथेत्युक्त्वा तं देशं प्रत्यपद्यत ॥ ३५ ॥
यत्र ते पुरुषव्याघ्रा भ्रातरोस्य निपातिताः ॥
तान्दृष्ट्वा दुःखितो भीमस्तृषया च प्रपीडितः ॥३६॥
अमन्यत महाबाहुः कर्म तद्यक्षरक्षसाम् ॥
स चिंतयामास तदा योद्धव्यं ध्रुवमद्यवै ॥३७॥
पश्यामि तावत्पानीयमिति पार्थो वृकोदरः ॥
ततोभ्यधावत्पानीयं पिपासुः पुरुषर्षभः ॥ ३८ ॥
यक्षउवाच—मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ॥
प्रश्नानुक्त्वा तु कौंतेय ततः पिब हरस्व च ॥३९॥

एवमुक्तस्तदा भीमो यक्षेणामिततेजसा ॥
अनुक्त्वैव तु तान्प्रश्नान्पीत्वैव निपपातह ॥ ४० ॥

ततः कुंतीसुतो राजा प्रचिंत्य पुरुषर्षभः ॥
समुत्थाय महाबाहुर्दह्यमानेन चेतसा ॥ ४१ ॥
व्यपेतजननिर्घोषं प्रविवेश महावनम् ॥
रुरुभिश्च वराहैश्च पक्षिभिश्च निषेवितम् ॥ ४२ ॥
नीलभास्वरवर्णैश्च पादपैरुपशोभितम् ॥
भ्रमरैरुपगीतं च पक्षिभिश्च महायशाः ॥ ४३ ॥
स गच्छन्कानने तस्मिन् हेमजालपरिष्कृतम् ॥
ददर्श तत्सरः श्रीमान् विश्वकर्मकृतं यथा ॥४४ ॥
उपेतं नलिनीजालैः सिंधुवारैः सचेतसैः ॥
केतकैः करवीरैश्च पिप्पलैश्चैव संवृतम् ॥

श्रमार्तस्तदुपागम्य सरो दृष्ट्वाथ विस्मितः ॥ ४५ ॥
इति युधिष्ठिरगीतायां द्वितीयोऽध्यायः ॥ २ ॥

वैशंपायन उवाच—सददर्श हतान् भ्रातॄन् लोकपालानिव च्युतान् ॥ युगांते समनुप्राप्ते शक्रप्रतिमगौरवान् ॥ १ ॥ विनिकीर्णधनुर्बाणं दृष्ट्वा निहतमर्जुनम् ॥ भीमसेनं यमौ चैव निर्विचेष्टान्गतायुषः ॥ २ ॥ सुदीर्घमुष्णं निःश्वस्य शोकबाष्पपरिप्लुतः ॥ तान्दृष्ट्वा पतितान्भ्रातॄन्सर्वांश्चैतासमन्वितः ॥ ३ ॥ धर्मपुत्रो महाबाहुर्विललाप सुविस्तरम् ॥

ननु त्वया महाबाहो प्रतिज्ञातं वृकोदर ॥ ४ ॥
सुयोधनस्य भेत्स्यामि गदया सक्थिनी रणे ॥
व्यर्थं तदद्यमे सर्वं त्वयि वीरे निपातिते ॥ ५ ॥

महात्मनि महाबाहो कुरूणां कीर्तिवर्धने ॥
मनुष्यसंभवा वाचो विधार्मिण्यः प्रतिश्रुताः ॥ ६ ॥
भवतां दिव्यवाचस्तु ता भवंतु कथं मृषा ॥
देवाश्चापि यदावोचन्सूतके त्वां धनंजय ॥ ७ ॥
सहस्राक्षादनवरः कुंति पुत्रस्तवेति वै ॥
उत्तरे पारियात्रे च जगुर्भूतानि सर्वशः ॥ ८ ॥
विप्रनष्टं श्रियंचैषामाहर्ता पुनरंजसा ॥
नास्य जेता रणेकश्चिदजेतानैष कस्यचित् ॥ ९ ॥
सोयं मृत्युवशं यातः कथं जिष्णुर्महाबलः ॥
अयं ममाशां संहत्य शेते भूमौ धनंजयः ॥ १० ॥

आश्रित्य यं वयं नाथं दुःखान्येतानि सेहिम ॥
रणे प्रमत्तौ वीरौ च सदा शत्रुनिबर्हणौ ॥ ११ ॥
कथं रिपुवशं यातौ कुंतीपुत्रौ महाबलौ ॥
यौ सर्वास्त्राप्रतिहतौ भीमसेनधनंजयौ ॥ १२ ॥
अश्मसारमयं नूनं हृदयं मम दुर्हृदः ॥
यमौ यदेतौ दृष्ट्वाद्य पतितौ नावदीर्यते ॥ १३ ॥
शास्त्रज्ञा देशकालज्ञास्तपोयुक्ताः कृपान्विताः ॥
अकृत्वा सदृशं कर्म किं शेध्वं पुरुषर्षभाः ॥ १४ ॥
अविक्षतशरीराश्चाप्यप्रमृष्टशरासनाः ॥
असंज्ञा भुवि संगम्य किंशेध्वमपराजिताः ॥ १५ ॥
सानूनि वाद्रेः संसुप्तान् दृष्ट्वा भ्रातॄन्महामतिः ॥
सुखं प्रसुप्तान् प्रास्विन्नः खिन्नः कष्टां दशांगतः ॥ १६ ॥
एवमेवेदमित्युक्त्वा धर्मात्मा स नरेश्वरः ॥
शोकसागरमध्यस्थो दध्यौ कारणमाकुलः ॥ १७ ॥
इतिकर्तव्यतां चेति देशकालविभागवित् ॥
नाभिपेदे महाबाहुश्चिंतयानो महामतिः ॥ १८ ॥
अथ संस्तभ्य धर्मात्मा तदात्मानं तपःसुतः ॥
एवं विलप्य बहधा धर्मपुत्रो युधिष्ठिरः ॥ १९ ॥
बुद्ध्या विचिन्तयामास वीराः केन निपातिताः ॥२०॥

नैषां शस्त्रप्रहारोस्ति पदं नेहास्ति कस्यचित् ॥
भूतं महदिदं मन्ये भ्रातरो येन मेहताः ॥ २१ ॥
एकाग्रंचिंतयिष्यामि पीत्वा वत्स्यामि वा जलम् ॥
स्यात्तु दुर्योधनेनेदमुपांशु विहितं कृतम् ॥ २२ ॥
गांधारराजरचितं सततं जिह्मबुद्धिना ॥
यस्य कार्यमकार्यं वा सममेव भवत्युत ॥ २३ ॥
करस्तस्य विश्वसेद्धीरो दुष्कृतेरकृतात्मनः ॥
अथवा पुरुषैर्गूढैः प्रयोगोऽयं दुरात्मनः ॥ २४ ॥
भवेदिति महाबुद्धिर्बहुधा तदचिन्तयत् ॥
तस्यासीन्न विशेषेणह्युदकं दूषितं यथा ॥ २५ ॥

मृतानामपि चैतेषां विकृतं नैव जायते ॥
मुखवर्णाः प्रसन्ना मे भ्रातॄणामित्यचिंतयत् ॥ २६ ॥
एकैकशश्चौघबलानिमान्पुरुषसत्तमान् ॥
कोन्यःप्रतिसमासेत कालांतकयमादृते ॥ २७ ॥
एतेन व्यवसायेन तत्तोयं व्यवगाढवान् ॥
गाहमानश्च तत्तोयमंतरिक्षात्स शुश्रुवे ॥ २८ ॥
यक्ष उवाच—अहं बकः शैवलमत्स्यभक्षा नीता मया
प्रेतवशं तवानुजाः ॥ तं पंचमो भविता राजपुत्र
नचेत्प्रश्नान्पृच्छतो व्याकरोषि ॥ २९ ॥
मातातसाहसं कार्षीर्मम पूर्वपरिग्रहः ॥
प्रश्नानुक्त्वा तु कौंतेय ततः पिब हरस्व च ॥ ३० ॥

र उवाच ॥
रुद्राणां वा वसूनां वा मरुतां वा प्रधानभाक् ॥
पृच्छामि को भवान्देवो नैतच्छकुनिना कृतम्॥३१ ॥
हिमवान्पारियात्रश्च विन्ध्यो मलय एव च ॥
चत्वारः पर्वताः केन पातिता भूरितेजसः ॥ ३२ ॥
अतीव ते महत्कर्म कृतं च बलिनां वर ॥
यन्न देवा न गंधर्वा नासुराश्च न राक्षसाः ॥ ३३ ॥
विषहेरन्महायुद्धे कृतं ते तन्महाद्भुतम् ॥
न ते जानामि यत्कार्यं नाभिजानामि कांक्षितम्॥३४॥
कौतूहलं महज्जातं साध्वसं चागतं मम ॥
येनास्म्युद्विग्नहृदयः समुत्पन्नशिरोज्वरः ॥ ३५ ॥
पृच्छामि भगवंस्तस्मात्को भवानिह तिष्ठति ॥
यक्ष उवाच—यक्षोहमस्मि भद्रं ते नास्मि पक्षो जलेचरः॥
मयैते निहताः सर्वे भ्रातरस्ते महौजसः॥ वैशंपायन
उवाच—ततस्तामाशिवां श्रुत्वा वाचं सपरुषाक्षराम् ३७
यक्षस्य ब्रुवतो राजन्नपक्रम्य तदा स्थितः ॥
विरूपाक्षं महाकायं यक्षं तालसमुच्छ्रयम् ॥ ३८ ॥
ज्वलनार्कप्रतीकाशमधृष्यं पर्वतोपमम् ॥
वृक्षमाश्रित्य तिष्ठंतं ददर्श भरतर्षभः ॥ ३९ ॥
मेघगंभीरनादेन तर्जयंतं महास्वनम् ॥
यक्ष उवाच--इमे ते भ्रातरो राजन् वार्यमाणा मयासकृत्॥

बलात्तोयं जिहीर्षंतस्ततो वै मृदिता मया ॥
नपेयमुदकं राजन् प्राणानिलपरीप्सया ॥ ४१ ॥
पार्थ मा साहसं कार्षीर्मम पूर्वपरिग्रहः ॥
प्रश्नानुक्त्वा तुकौंतेय ततः पिब हरस्वं च ॥ ४२ ॥
युधिष्ठिर उवाच—न चाहं कामये यक्ष तव पूर्वपरिग्रहम्॥
कामं नैतत्प्रशंसंति संतो हि पुरुषाः सदा ॥ ४३ ॥
यदात्मना स्वमात्मानं प्रशंसेत्पुरुषर्षभ ॥
यथाप्रज्ञं तु ते प्रश्नान्प्रतिवक्ष्यामि पृच्छ माम् ॥ ४४ ॥
यक्ष उवाच—किंस्विदादित्यमुत्तपति केच तस्याभित-
श्चराः॥ कश्चैनमस्तं नयति कस्मिंश्च प्रतितिष्ठति॥ ४५ ॥

युधिष्ठिर उवाच–ब्रह्मादित्यमुत्तपति देवास्तस्याभि-
तश्चराः॥धर्मश्चास्तं नयति च सत्येच प्रतितिष्ठति ४६॥
यक्ष उवाच–केनस्विच्छ्रोत्रियो भवति केनस्विद्विंदते
महत्॥केनस्विद्वितीयवान् भवति राजन्केन च बु-
द्धिमान् ॥ ४७ ॥ युधिष्ठिर उवाच–श्रुतेन श्रोत्रियो
भवति तपसा विंदते महत्॥धृत्या द्वितीयवान्भवति
बुद्धिमान्वृद्धसेवया ॥ ४८ ॥ यक्ष उवाच–किं
ब्राह्मणानां देवत्वं कश्च धर्मः सतामिव॥कश्चैषां मानु-
षो भावः किमेषामसतामिव ॥ ४९ ॥ युधिष्ठिर
उवाच–स्वाध्याय एषां देवत्वं तप एषां सतामिव ॥
मरणं मानुषोभावः परिवादोऽसतामिव ॥ ५० ॥
यक्ष उवाच–किं क्षत्रियाणां देवत्वं कश्च धर्मः सतामिव ॥
कश्चैषां मानुषो भावः किमेषामसतामिव ॥ ५१ ॥
युधिष्ठिर उवाच-इष्वस्त्रमेषां दैवत्वं यज्ञ एषां सतामिव॥
भयं वै मानुषो भावः परित्यागोऽसतामिव ॥ ५२ ॥
यक्ष उवाच -किमेकं यज्ञियं साम किमेकं यज्ञियं यजुः॥
का चैषां वृणते यज्ञं कान्यज्ञो नाति वर्त्तते ॥ ५३ ॥
युधिष्ठिर उवाच--प्राणो वै यज्ञियं साम मनो वै यज्ञियं
यजुः॥ ऋगेका वृणते यज्ञं तापसो नातिवर्तते ॥ ५४ ॥
यक्ष उवाच–किंस्विदावपतां श्रेष्ठं किंस्विन्निवपतां
वरम्॥किंस्वित्प्रतिष्ठमानानां किंस्वित्प्रसवतां वरम् ॥

युधिष्ठिर उवाच–वर्षमावपतां श्रेष्ठं बीजं निवपतां वर
म् ॥ गावः प्रतिष्ठमानानां पुत्रः प्रसवतां वरः॥५६॥
यक्ष उवाच–इंद्रियार्थाननुभवन्बुद्धिमान् लोकपूजि-
तः ॥ संमतः सर्वभूतानामुच्छ्वसन्को न जीवति ॥
॥ ५७ ॥ युधिष्ठिर उवाच–देवतातिथिभृत्यानां
पितॄणामात्मनश्चयः ॥ ननिर्वपति पंचानामुच्छ्वस-
न्न स जीवति ॥५८॥ यक्ष उवाच–किंस्विद्गुरुतरंभू-
मेःकिंस्विदुच्चतरं च खात्॥ किंस्विच्छीघ्रतरं वायोः
किंस्विद्बहुतरं तृणात् ॥ ५९ ॥ युधिष्ठिर उवाच–

मातागुरुतराभूमेः खात्पितोच्चतरस्तथा ॥ मनःशीघ्र-
तरं वाताच्चिंता बहुतरी तृणात् ॥ ६० ॥

यक्ष उवाच–किंस्वित्सुप्तं न निमिषति किंस्विज्जातं न चोपति ॥ कस्यस्विद्धृदयं नास्ति किंस्विद्वेगेन वर्द्धते ॥ ६१ ॥ युधिष्ठिर उवाच–मत्स्यः सुप्तो न निमिषत्यंडं जातं नचोपति॥अश्मनो हृदयं नास्ति नदी वेगेन वर्धते ॥ ६२ ॥ यक्ष उवाच–किंस्वित्प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः ॥ आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः ॥६३॥ युधिष्ठिर उवाच–सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः ॥ आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ॥ ६४ ॥ यक्ष उवाच–कोतिथिः सर्वभूतानां किंस्विद्धर्म सनातनम् ॥ अमृतं किंस्विद्राजेंद्र किंस्वित्सर्वमिदं जगत् ॥ ६५ ॥

युधिष्ठिर उवाच—अतिथिः सर्वभूतानामग्निः सोमोग-
वामृतम् ॥ सनातनोऽमृतो धर्मो वायुः सर्वमिदं जगत्
॥ ६६ ॥ यक्ष उवाच—किंस्विदेको विचरते जातः
को जायते पुनः ॥ किंस्विद्धिमस्य भैषज्यं किंस्वि-
दावपनं महत् ॥ ६७ ॥ युधिष्ठिर उवाच—सूर्य
एको विचरते चंद्रमा जायते पुनः ॥ अग्निर्हिमस्य
भैषज्यं भूमिरावपनं महत् ॥ ६८ ॥ यक्ष उवाच—
किंस्विदेकपदं धर्म्यं किंस्विदेकपदं यशः ॥ किं-
स्विदेकपदं स्वर्ग्यं किंस्विदेकपदं सुखम् ॥ ६९ ॥
युधिष्ठिर उवाच—दाक्ष्यमेकपदं धर्म्यं दानमेक-
पदं यशः ॥ सत्यमेकपदं स्वर्ग्यं शीलमेकपदं
सुखम् ॥ ७० ॥

यक्ष उवाच–किंस्विदात्मा मनुष्यस्य किंस्विद्दैव-
कृतःसखा ॥ उपजीवनं किंस्विदस्य किंस्विदस्य
परायणम्॥७१॥युधिष्ठिर उवाच–पुत्र आत्मा मनु-
ष्यस्य भार्या दैवकृतः सखा ॥ उपजीवनं च पर्ज-
न्यो दानमस्य परायणम् ॥ ७२ ॥ यक्ष उवाच -
धन्यानामुत्तमं किंस्विद्धनानां स्यात्किमुत्तमम् ॥
लाभानामुत्तमं किंस्यात्सुखानां स्यात्किमुत्तमम् ७३ ॥
युधिष्ठिर उवाच–धन्यानामुत्तमं दाक्ष्यं धनानामु-
त्तमं श्रुतम्॥लाभानां श्रेय आरोग्यं सुखानां तुष्टि-
रुत्तमा ॥ ७४ ॥ यक्ष उवाच–कश्च धर्मः परो लोके
कश्च धर्मः सदाफलः ॥ किं नियम्य न शोचंति कैश्च
संधिर्न जीर्यते ॥ ७५ ॥

युधिष्ठिर उवाच–आनृशंस्यं परोधर्मस्त्रयीधर्मः सदाफलः ॥ मनो यस्य न शोचंति संधिः सद्भिर्न जीर्यते ॥ ७६ ॥ यक्ष उवाच–किंनु हित्वा प्रियो भवति किं नु हित्वा न शोचति ॥ किंनु हित्वार्थवान् भवति किंनु हित्वा सुखी भवेत् ॥ ७७ ॥ युधिष्ठिर उवाच–मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति ॥ कामं हित्वार्थवान् भवति लोभं हित्वा सुखी भवेत् ॥ ७८ ॥ यक्ष उवाच--किमर्थ ब्राह्मणे दानं किमर्थं नटनर्तके ॥ किमर्थं चैव भृत्येषु किमर्थं चैव राजसु ॥ ७९ ॥ युधिष्ठिर उवाच--धर्मार्थं ब्राह्मणे दानं यशोर्थं नटनर्तके ॥ भृत्ये सुभरणार्थं वै भयार्थं चैव राजसु ॥ ८० ॥

यक्ष उवाच--केनस्विदावृतो लोकः केनस्विन्न प्रकाशते ॥ केन त्यजति मित्राणि केन स्वर्गं न गच्छति ॥ ८१ ॥ युधिष्ठिर उवाच--अज्ञानेनावृतो लोकस्तमसा न प्रकाशते॥लोभस्त्यजति मित्राणि संगात्स्वर्गं न गच्छति ॥ ८२ ॥ यक्ष उवाच--मृतः कथं स्यात्पुरुषः कथं राष्ट्रं मृतं भवेत् ॥ श्राद्धं मृतं कथं वा स्यात्कथं यज्ञो मृतो भवेत् ॥ ८३ ॥ युधिष्ठिर उवाच--मृतो दरिद्रः पुरुषो मृतं राष्ट्रम-

राजकम् ॥ मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वद-
क्षिणः ॥ ८४ ॥ यक्ष उवाच--का दिक्किमुदकं प्रोक्तं
किमन्नं किंच वै विषम् ॥ श्राद्धस्य कालमाख्याहि
ततः पिब हरस्व च ॥ ८५ ॥

युधिष्ठिर उवाच--सन्तो दिग्जलमाकाशं गौरन्नं
प्रार्थना विषम् ॥ श्राद्धस्य ब्राह्मणः कालः कथं वा
यक्ष मन्यसे ॥ ८६ ॥ यक्ष उवाच--तपः किंलक्षणं
प्रोक्तं को दमश्च प्रकीर्त्तितः॥क्षमा च का परा प्रोक्ता
काच ह्रीः परिकीर्त्तिता ॥ ८७ ॥ युधिष्ठिर उवाच--

तपः स्वधर्मवर्तित्वं मनसो दमनं दमः ॥ क्षमा
द्वंद्वसहिष्णुत्वं ह्रीरकार्य निवर्तनम् ॥ ८८ ॥ यक्ष
उवाच--किं ज्ञानं प्रोच्यते राजन् कः शमश्च प्रकीर्ति-
तः॥दया च का परा प्रोक्ता किं चार्जवमुदाहृतम् ॥८९॥
युधिष्ठिर उवाच--ज्ञानन्तत्वार्थबोधश्च शमश्चित्तप्रशां-
तता ॥ दयासर्वसुखैषित्वमार्जवं समचित्तता ॥९०॥

यक्ष उवाच—कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनंतकः॥
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ॥ ९१ ॥
युधिष्ठिर उवाच—क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिर-
नंतकः॥सर्वभूतहितः साधुरसाधुर्निर्दयःस्मृतः॥९२॥
यक्ष उवाच—को मोहः प्रोच्यते राजन् कश्च मानः प्र-
कीर्त्तितः॥ किमालस्यं च विज्ञेयं कश्च शोकः प्रकी-
र्तितः ॥ ९३ ॥ युधिष्ठिर उवाच—मोहो हि धर्ममूढ-
त्वं मानस्त्वात्माभिमानिता ॥ धर्मनिष्क्रियता-
लस्यं शोकस्त्वज्ञानमुच्यते॥ ९४ ॥ यक्ष उवाच—
किं स्थैर्यमृषिभिः प्रोक्तं किञ्च धैर्यमुदाहृतम् ॥
स्नानं च किं परं प्रोक्तं दानं च किमिहोच्यते ॥ ९५ ॥

युधिष्ठिर उवाच--स्वधर्मे स्थिरता स्थैर्य्यं धैर्यमिंद्रियनिग्रहः॥ स्नानं मनोमलत्यागो दानं वै भूतरक्षणम् ॥ ९६ ॥ यक्ष उवाच--कः पंडितः पुमान् ज्ञेयो नास्तिकः कश्च उच्यते ॥ को मूर्खः कश्च कामःस्यात्को मत्सर इति स्मृतः ॥९७॥ युधिष्ठिर उवाच--धर्मज्ञः पंडितो ज्ञेयो नास्तिको मूर्ख उच्यते॥कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ॥ ९८ ॥ यक्ष उवाच--कोहंकार इति प्रोक्तः कश्च दंभः प्रकीर्तितः॥ किं तद्दैवं परं प्रोक्तं किंतत्पैशुन्यमुच्यते ॥ ९९ ॥ युधिष्ठिर उवाच--महाज्ञानमहंकारो दंभो धर्मध्वजोच्छ्रयः॥दैवं दानफलं प्रोक्तं पैशुन्यं परदूषणम्१००॥

यक्ष उवाच--धर्मश्चार्थश्च कामश्च परस्परविरोधिनः॥
एषां नित्यविरुद्धानां कथमेकत्र संगमः ॥१॥ युधि-
ष्ठिर उवाच--यदाधर्मश्च भार्या च परस्परवशानुगौ॥
तदा धर्मार्थकामानां त्रयाणामपि संगमः ॥ २ ॥
यक्ष उवाच--अक्षयो नरकः केन प्राप्यते भरतर्षभ ॥
एतन्मे पृच्छतः प्रश्नं तच्छीघ्रं वक्तुमर्हसि ॥३॥युधि-
ष्ठिर उवाच--ब्राह्मणं स्वयमाहूय याचमानमकिंच-
नम् ॥ पश्चान्नास्तीति यो ब्रूयात्सोक्षयं नरकं व्रजेत्
॥ ४ ॥ वेदेषु धर्मशास्त्रेषु मिथ्यापोतैर्द्विजातिषु ॥
देवेषु पितृधर्मेषु सोक्षयं नरकं व्रजेत् ॥ ५ ॥
विद्यमाने धने लोभाद्दानभोगविवर्जितः ॥
पश्चान्नास्तीति योब्रूयात्सोक्षयं नरकं व्रजेत् ॥ ६ ॥
यक्ष उवाच--राजन्कुलेन वृत्तेन स्वाध्यायेन श्रुतेन वा ॥
ब्राह्मण्यं केन भवति प्रब्रूह्येतत्सुनिश्चितम् ॥ ७ ॥
युधिष्ठिर उवाच--शृणु यक्ष कुलं तात न स्वाध्यायो
न च श्रुतम् ॥ कारणं हि द्विजत्वे च वृत्तमेव न संश-
यः ॥ ८ ॥ वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ॥
अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः ॥ ९ ॥
पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिंतकाः ॥
सर्वे व्यसनिनो मूर्खा यः क्रियावान्सपंडितः ॥ १० ॥

चतुर्वेदोपि दुर्वृत्तः स शूद्रादतिरिच्यते ॥ योग्नि-
होत्रपरो दांतः स ब्राह्मण इति स्मृतः ॥ ११ ॥ यक्ष
उवाच—प्रियवचनवादी किं लभते विमृशितकार्य-
करः किं लभते ॥ बहुमित्रकरः किं लभते धर्मरतः
किं लभते कथय ॥ १२ ॥ युधिष्ठिर उवाच—प्रिय-
वचनवादी प्रियो भवति विमृशितकार्यकरोधिकं
जयति ॥ बहुमित्रकरः सुखं वसते यश्च धर्मरतः
स गतिं लभते ॥ १३ ॥ यक्ष उवाच--को मोदते कि-
माश्चर्यं कः पंथाः का च वार्तिका ॥ वद मे चतुरः
प्रश्नान् मृता जीवंतु बांधवाः ॥ १४ ॥ युधिष्ठिर
उवाच--पंचमेहनि षष्ठे वा शाकं पचति स्वे गृहे ॥
अनणी चाप्रवासी च सवारिचर मोदते ॥ १५ ॥

अहन्यहनि भूतानि गच्छंतीह यमालयम् ॥ शेषाः स्थावरमिच्छंति किमाश्चर्य्यमतः परम् ॥ १६ ॥ तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नैको मुनिर्यस्य वचः प्रमाणम्॥धर्मस्य तत्वं निहितं गुहायां महाजनो येन गतः सपंथाः॥ १७ ॥ अस्मिन्महामोहमये कटाहे सूर्याग्निना रात्रिदिवेंधनेन ॥ मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता॥१८॥ यक्ष उवाच-- व्याख्याता मे त्वया प्रश्ना याथातथ्यं परंतप ॥ पुरुषं त्विदानीं व्याख्याहि यश्च सर्वधनी नरः॥१९॥ युधिष्ठिर उवाच--दिवं स्पृशति भूमिंच शब्दं पुंण्येन कर्मणा॥ यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥ २० ॥

तुल्ये प्रियाप्रिये यस्य सुखदुःखे तथैव च ॥ अतीतानागते चोभे स वै धर्मधनी नरः ॥ २१ ॥ यक्ष

उवाच—व्याख्यातः पुरुषो राजन्यश्च धर्मधरो नरः॥
तस्मात्त्वमेकं भ्रातॄणां यमिच्छसि स जीवतु ॥२२॥
युधिष्ठिर उवाच—श्यामो य एष रक्ताक्षो बृहच्छाल इवोत्थितः ॥ व्यूढोरस्को महाबाहुर्नकुलो यक्ष जीवतु ॥ २३ ॥ यक्ष उवाच—प्रियस्तेभीमसेनोय-मर्जुनोवः परायणम् ॥ स कस्मान्नकुलो राजन् सापत्नं जीवमिच्छसि ॥२४॥ यस्य नागसहस्रेण दश संख्येन वै बलम् ॥ तुल्यं तं भीममुत्सृज्य नकुलं जीवमिच्छसि ॥ २५ ॥

तथैनं मनुजाः प्राहुर्भीमसेनं प्रियं तव ॥
अथ केनानुभावेन सापत्नं जीवमिच्छसि ॥ २६ ॥
यस्य बाहुबलं सर्वे पांडवाः समुपासते ॥

अर्जुनं तमपाहाय नकुलं जीवमिच्छसि ॥ २७ ॥
युधिष्ठिर उवाच--धर्म एव हतो हंति धर्मो रक्षति रक्षितः॥
तस्माद्धर्मं न त्यजामि मानो धर्मो हतोवधीत् ॥ २८ ॥
आनृशंस्यं परो धर्मः परमार्थाच्च मे मतम् ॥
आनृशंस्यं चिकीर्षामि नकुलो यक्ष जीवतु ॥ २९ ॥
धर्मशीलः सदा राजा इति मां मानवा विदुः ॥
स्वधर्मान्न चलिष्यामि न कुलो यक्ष जीवतु ॥ ३० ॥

कुंतीचैव तु माद्री च द्वे भार्ये तु पितुर्मम ॥
उभे सपुत्रे स्यातां वै इति मे धीयते मतिः ॥ ३१ ॥
यथा कुंती तथा माद्री विशेषो नास्ति मे तयोः ॥
मातृभ्यां समामिच्छामि नकुलो यक्ष जीवतु ॥ ३२ ॥
यक्ष उवाच—यस्य तेर्थाच्च कामाच्च आनृशंस्यं परं
मतम् ॥ तस्मात्ते भ्रातरः सर्वे जीवंतु भरतर्षभ ॥ ३३ ॥
इति युधिष्ठिरगीतायां तृतीयोऽध्यायः ॥ ३ ॥

वैशंपायन उवाच--ततस्ते यक्षवचनादुदातिष्ठंत पांडवाः ॥ क्षुत्पिपासे च सर्वेषां क्षणेन व्यपगच्छताम् ॥ १ ॥ युधिष्ठिर उवाच--सरस्येकेन पादेन तिष्ठंतमपराजितम् ॥ पृच्छामि को भवान्देवो न मे यक्षो मतो भवान् ॥२॥ वसूनां वा भवानेको रुद्राणामथवा भवान् ॥ अथवा मरुतां श्रेष्ठो वज्री वा त्रिदशेश्वरः ॥ ३ ॥ मम हि भ्रातर इमे सहस्रशतयोधिनः ॥ तं योधं न प्रपश्यामि येन सर्वे निपातिताः ॥ ४ ॥ सुखं प्रतिप्रबुद्धानामिन्द्रियाण्युपलक्षये ॥ स भवान्सुहृदोस्माकमथवा नः पिता भवान् ॥ ५ ॥

यक्ष उवाच--अहं ते जनकस्तात धर्मो मृदुपराक्रम ॥ त्वां दिदृक्षुरनुप्राप्तो विद्धि मां भरतर्षभ ॥ ६ ॥ यज्ञः सत्यं दमः शौचमार्जवं ह्रीरचापलम् ॥ दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम ॥ ७ ॥ अहिंसा समता शान्तिस्तपः शौचममत्सरः ॥ द्वाराण्येतानि मे विद्धि प्रियो ह्यसि सदा मम ॥ ८ ॥ दिष्ट्या पंचसु रक्तोसि दिष्ट्या ते षट्पदी जिता ॥ द्वे पूर्वे मध्यमे द्वेच द्वेचान्ते सांपरायिके ॥ ९ ॥ धर्मोहमिति भद्रं ते जिज्ञासुस्त्वामिहागतः ॥ आनृशंस्येन तुष्टोस्मि वरं दास्यामि तेऽनघ ॥ १० ॥

वरं वृणीष्व राजेंद्र दाताह्यस्मि तवानघ ॥
ये हि मे पुरुषा भक्ता न तेषामस्ति दुर्गतिः ॥ ११ ॥
युधिष्ठिर उवाच-- अरणीसहितं यस्य मृगो ह्यादाय
गच्छति॥तस्याग्नयो न लुप्येरन् प्रथमोस्तु वरो मम १२
यक्ष उवाच--अरणीसहितं ह्यस्य ब्राह्मणस्य हृतं मया।
मृगवेषेण कौंतेय जिज्ञासार्थं तव प्रभो ॥ १३ ॥
वैशंपायन उवाच--ददानीत्येव भगवानुत्तरं प्रत्य-
पद्यत ॥ अन्यं वरय भद्रं ते वरं त्वममरोपम ॥ १४ ॥
युधिष्ठिर उवाच--वर्षाणि द्वादशारण्ये त्रयोदशमुप-
स्थितम् ॥ तत्र नो नाभिजानीयुर्वसतो मनुजाः
क्वचित् ॥ १५ ॥
वैशंपायन उवाच--ददानीत्येव भगवानुत्तरं प्रत्यपद्यत॥
भूयश्चाश्वासयामास कौंतेयं सत्यविक्रमम् ॥ १६ ॥
यद्यपि स्वेन रूपेण चरिष्यथ महीमिमाम् ॥
न वो विज्ञास्यते कश्चित्रिषुलोकेषु भारत ॥ १७ ॥
वर्षं त्रयोदशमिदं मत्प्रसादात्कुरूद्वहाः ॥
विराटनगरे गूढा अविज्ञाताश्चरिष्यथ ॥ १८ ॥
यद्वः संकल्पितं रूपं मनसा यस्य यादृशम् ॥
तादृशं तादृशं सर्वे छंदतो धारयिष्यथ ॥ १९ ॥
अरणीसहितं चेदं ब्राह्मणाय प्रयच्छत ॥
जिज्ञासार्थं मया ह्येतदाहृतं मृगरूपिणा ॥ २० ॥

प्रवृणीष्वापरं सौम्य वरमिष्टं ददामि ते ॥
न तृप्यामि नरश्रेष्ठ प्रयच्छन्वै वरांस्तथा ॥ २१ ॥
तृतीयं गृह्यतां पुत्र वरमप्रतिमं महत् ॥
त्वं हि मत्प्रभवो राजन् विदुरश्च ममांशजः ॥ २२ ॥
युधिष्ठिर उवाच—देवदेवो मया दृष्टो भवान्साक्षात्सना-
तनः॥यंयं ददासि वा तुष्टस्तं ग्रहीष्याम्यहं पितः ॥
॥ २३ ॥ अजेयौ लोभमोहौ च क्रोधं चाहं सदा विभो ॥
दाने तपसि सत्येच मनो मे सततं भवेत् ॥ २४ ॥
धर्म उवाच—उपपन्नो गुणैरेतैः स्वभावेनासि पांडव ॥
भवान् धर्मः पुनश्चैव यथोक्तं ते भविष्यति ॥ २५ ॥

वैशंपायन उवाच—इत्युक्त्वांतर्दधे धर्मो भगवॉल्लो-
कभावनः ॥ समेताः पांडवाश्चैव सुखसुप्ता मनस्विनः
॥ २६ ॥ उपेत्य चाश्रमं वीराः सर्व एव गतक्लमाः ॥
आवृणेयं ददौ तस्मै ब्राह्मणाय तपस्विने ॥ २७ ॥
इदं समुत्थानसमागतं महत्पितुश्च पुत्रस्य च कीर्ति
वर्धनम् ॥ पाठान्नरः स्याद्विजितेंद्रियो वशी सपुत्र-
पौत्रः शतवर्षभाग्भवेत् ॥ २८ ॥ नचाप्यधर्मे न
सुहृद्विभेदने परस्वहारे परदारमर्शने॥ कदर्य्यभावे न
रमेन्मनः सदा नृणां सदाख्यानमिदं विजानताम् २९ ॥

इति युधिष्ठिरगीतायां चतुर्थोऽध्यायः ॥ ४ ॥

युधिष्ठिरगीता समाप्ता